Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथाश्वारूढामन्त्र उच्यते —

दीर्घतया ऋषिः । गायत्री छन्दः । अश्वारूढा देवता । आं बीजम् । ह्रीं शक्तिः । क्रों कीलकम् । प्रणवभुवनेश्यौ वा बीजशक्ती । स्वाहा वा शक्तिः । वश्यप्रधानोयं मन्त्रः । प्रणवपाशाभ्यां हृदयम् । शक्त्या शिरः । क्रों शिखा । एहि कवचम् । परमेश्वरि नेत्रम् । स्वाहा अस्त्रम् । आं हृत् । ह्रीं शिरः । क्रों शिखा । आं कवचम् । ह्रीं नेत्रम् । क्रों अस्त्रम् इति वा ।

ध्यानम् — अश्वारूढा कराग्रैर्नवकनकमयीं वेत्रयष्टिं दधाना
दक्षेऽन्येनानयन्ती स्फुरिततनुलतां पाशबद्धां स्वसाध्याम् ।
देवी नित्या प्रसन्नाननशशधरबिम्बा त्रिणेत्राभिरामा
दद्यादाद्यानवद्या प्रवरसुखफलप्राप्तिहृद्यां श्रियं वः ॥

कल्पान्तरोक्तध्यानमुच्यते —

उत्तुङ्गतुरगारूढे करोद्यत्पाशदण्डिनि ।
नारीलोकमशेषं मे वशमानय पार्वति ॥

ध्यानान्तरम् —

रक्तामस्वाधिरूढां नवकनकमयीं वेत्रयष्टिं दधानां
पाशेनाबध्य साध्यां स्मरशरविवशां दक्षिणेनानयन्तीम् ।
नानाकल्पाभिरामामरुणकिरणसंकाशवस्त्रां प्रसन्नां
देवीं ध्यायेज्जगन्मोहनवशकरणीं पार्वतीं साधकेन्द्रः ॥

ओं आं ह्रीं क्रों एहि परमेश्वरि स्वाहा । इति मन्त्रः त्रयोदशार्णः । पाशादिबीजत्रयं मूलग्रन्थे अनुक्तमपि विवरणकारैरुक्तम् । अयुतं जपेत् । आज्येन सहस्रं पुरश्चरणाहोमः ॥

अथ पूजाविधिः —

नवमपटले प्रोक्तभुवनेशीविधानोक्ते पीठे समावाह्य समर्चयेत् ।
अङ्गैः प्रथमावृतिः । मातृभिर्द्वितीया । इन्द्रादिभिस्तृतीयावृतिः ॥

अथ प्रयोगः —

ध्यातापि गिरिसुतेयं जगतीं विश्वां वशीकरोत्यनिशम् ।

प्रयोगान्तरम् —

विधयाऽनुदिनहृद्यथयाऽनया होमकर्म वरहेमदायि तत् ।
द्रव्यानुक्ते घृतमिति न्यायात् घृतैस्सहस्रं हुनेदित्यर्थः ।
कामितां सपदि वामलोचनामानयेदधिकमारपीडिताम् ।

प्रयोगान्तरम् —

हवनक्रिया सपदि वश्यकरी मधुरात्रसेकपटुना पटुना ।
अयमर्थः — पटु-मीठ (लवणं) । त्रिमधुरसिक्तैर्लवणैर्हुनेद्वश्यार्थम् ।
सदृशो न कश्चन जगत्यपरो मनुनामुनाऽऽनयनकर्मविधौ ।
इति मन्त्रप्रशंसा कृता ॥

अथ श्रीमुखन्यासविधिरुच्यते —

अस्य लक्ष्मीनारायण ऋषिः । बृहती छन्दः । श्रीर्देवता । श्रीं बीजम् ।
ह्रीं शक्तिः ॥

वाणी स्यात्तारुरूपा शिरसि गिरिसुता शक्तिरूपा ललाटे
रव्यग्न्यक्ष्णोस्तथामौ विधुरपि वदनावेष्टने ठान्तरूपः ।
श्रीर्जिह्वायां स्वरूपा मद इह करिरूपौ स्वहौ दीर्घयुक्ता-
वेवं न्यासो मुखश्रीसुखविभवयशःकान्तिमेधाकरः स्यात् ॥

अस्यार्थः — अंगुष्ठमध्याग्रे संश्लिष्टे विधाय अन्यास्तिस्रोंगुलीः तलाग्रसंश्लिष्टाग्रसुश्लिष्टाग्रा विधाय अंगुष्ठमध्यमाग्राभ्यां प्रणवादिबीजैः सरस्वत्यादिभावनया सरस्वत्यादिनामोत्तरैः वक्ष्यमाणप्रकारेण न्यसेत् । ओं सरस्वत्यै नमः। ह्रीं पार्वत्यै नमः । अं सूर्याय नमः । मं अग्नये नमः । ठं चन्द्रमसे नमः । श्रीं श्रियै नमः । स्वां करिण्यै नमः । हां करिण्यै नमः ॥

अस्य न्यासस्य स्थानमुच्यते —

मूर्धललाटनेत्रद्वयमुखवृत्तजिह्वाकपोलद्वन्द्वेषु विन्यसेत् क्रमशः। एवं न्यस्त्वा उक्तफलमाप्नोति ॥

अथास्या अश्वारूढाया विवरणोक्तं यन्त्रमुच्यते —

षोडशकोष्ठानि लिखित्वा मध्यचतुष्करेखां मार्जयित्वा (तत्र मध्ये) प्रणवं ससाध्यं विलिखेत्। अवशिष्टेषु (कोष्ठेषु) अवशिष्टान्वर्णान्विलिखेत्। सर्ववश्यकरमिदं यन्त्रम् ॥

अथ मन्त्रसारोक्तप्रकारेणापि अश्वारूढाविधानमुच्यते —

शक्तिः ऋषिः। विराट् छन्दः। गिरीन्द्रसुता देवता। आं हृत्। ह्रीं शिरः। क्रों शिखा। एहि कवचम्। परमेश्वरि नेत्रम्। स्वाहा अस्त्रम्॥ ध्यानम् —

पाशेनाबध्य साध्यां स्मरशरविवशां वामदोष्णानयन्तीं
सौवर्णीं वेत्रयष्टिं निजकरकमलेनापरेणादधानाम्।
रक्तां रक्ताङ्गरागाम्बरकुसुमयुतामश्वमंस्थां प्रसन्नां
देवीं बालेन्दुचूडां मनसि मुनिनुतां पार्वतीं भावयामि ॥

आं ह्रीं क्रों एहि परमेश्वरि स्वाहा। इति द्वादशाक्षरोयं मन्त्रः ॥

पादाग्रजानुशिवनाभिहृदंसकण्ठ-
जिह्वाग्रघोणनयनालिकशीर्षकेषु।
न्यस्याक्षराणि च मनोरथपञ्चबाणान्
न्यसयेत्तनौ शितमतिर्दशधा पुरोक्तान् ॥

प्रागष्टमपटले स्वयंवराविधाने प्रोक्तानित्यर्थः ॥ अयुतं जपेत् पुरश्चरणार्थम्। आज्यैर्दशांशं जुहुयात् ॥

अथ पूजाविधिः—

पूर्वमष्टमपटले प्रोक्तस्वयंवराविधानोक्तवत् पूजा । अत्र तु प्रथमावृतौ शक्तिं यजेत् । पुनरङ्गाद्यावरणानि क्रमेण । हृल्लेखागगनारक्ताकरालिका महोच्छुष्मा अत्र शक्तयः ॥

अथ प्रयोगः—

मधुरत्रयसंयुतैस्सरोजैररुणाभैर्विकचैस्सहस्रसंख्यम् ।
दिवसस्य मुखे जुहोतु वह्नौ यशसे सर्वसमृद्धये सुतास्यै ॥

पटुनाष्टसहस्रतयं मधुरैर्जुहुयादनले सुसमिद्धतरे ।
स तु मण्डलतो जगतां त्रितयं वशयेत्परमां समवाप्य रमाम् ॥

पटु—मीठ (लवणम्) । त्रिमधुरसिक्तैर्लवणैर्जुहुयात् इत्यर्थः ॥

प्रयोगान्तरम्—

उदये सहस्रभानोस्सहस्रपत्रे विकस्वरे न्यस्य ।
नवनीतं तेनाग्नौ जुहुयाल्लभते महत्तरां लक्ष्मीम् ॥

सहस्रपत्रं—कमलम् ।

प्रयोगान्तरम्—

लोणकृतमुद्रिकाभिः दध्यक्ताभिर्हुतक्रिया त्रिदिनम् ।
लक्ष्मीकरी नराणां जनतासंवादकारिणी चोक्ता ॥

लोणं—लवणम् । मुद्रिका—गुडिका ॥

अथास्य यन्त्रम्—

कोष्ठान्यालिख्य मन्त्री विकृतिपरिमितान्येषु मध्ये चतुष्कं
संमार्न्यास्मिन्ससाध्यं प्रणवमभिलिखेन्मन्त्रवर्णान्परेषु ।

वर्णैर्वीतं घटस्थं जलरुहपुटितं साधुसंपातसिक्तं
कुर्याद्वश्यां त्रिलोकीं मनुजपमहितं धारयन्यन्त्रमेतत् ॥

अस्यार्थः — विकृतिपरिमितान् षोडशपरिमितानित्यर्थः । वर्णैर्वीतं मातृकावर्णैर्वेष्टितमित्यर्थः ॥ अस्य फलमाह —

मन्त्रेणानेन सदृङ् नान्योऽस्त्याकर्षणे विशेषेण ।
मन्त्री मनुवरमेनं तस्माद्भक्त्या भजेदभीप्सितदम् ॥

प्रोक्तान्स्वयंवरस्य(वरायाः) प्रयोगभेदाननेन मन्त्रेण ।
कुर्यान्मन्त्री मन्त्रोरनयोर्नैवास्ति किञ्चिदपि भेदः ॥

अथाश्वारूढायाः (मन्त्र) अक्षरस्तोत्रं कल्पान्तरोक्तमत्र लिख्यते —

ओंकारभद्रपीठामुद्यन्मार्ताण्डमण्डलच्छायाम् ।
उल्लासिकमलवदनामुज्ज्वलवेषामुपास्महे गौरीम् ॥ १ ॥

आन्तरतमोनिहन्त्रीमाश्रयतामखिलमोहनाकाराम् ।
कलये कामपि करुणामरुणां गुरुणा प्रबोधितामन्तः ॥ २ ॥

ह्रींकारवाच्यरूपां हृतभक्तजनार्तिमिन्दुखण्डधराम् ।
अनुसन्धयामि विद्यामाद्यामश्वाधिरोहकौतुकिनीम् ॥ ३ ॥

क्रोडीभवन्मुकुन्दो हंसीभूतो विधिश्च यद्व्यक्तिम् ।
अनलमभूतां वेत्तुं तस्य स्थाणोर्भजे परां शक्तिम् ॥ ४ ॥

एधन्ते निरपाया यच्चरणजुषां विभूतयो विदुषाम् ।
अश्वाधिरोहिणीं तामम्बामानन्दकन्दलीं वन्दे ॥ ५ ॥

हितमुपदिशामि चेतो विजहिहि वृद्धान्वयापरिभ्रमणम् ।
परिहर बाहितमखिलं पशुपतिदयितापदाम्बुजस्मरणात् ॥ ६ ॥

परिहसितविद्रुमलताप्रभया पर्याप्तमधुमदस्फुरणा ।
वागपिच वर्णयन्तीवद्गतिवल्गत्तुरङ्गमाहृदये ॥ ७ ॥

रञ्जयति भुवनमखिलं वशयति वाणीं श्रियं समुन्नयति ।
शमयति तमांसि पुंसां चरणस्मृतिरेव शैलकन्यायाः ॥ ८ ॥

मेघश्यामळचिकुरां मीनध्वजविजयदीपिकाकलिकाम् ।
सुमुखीं तुरङ्गसंस्थां सुलभां सौभाग्यदेवतामीडे ॥ ९ ॥

श्वः खलु न भवति यस्मात् तस्मादश्वश्चराचरो लोकः ।
तमधिवसन्तीमम्बां अश्वारूढां वदन्ति तत्त्वविदः ॥ १० ॥

रिक्तत्वं परिहर्तुं कर्तुं स्कन्धाधिरोहणं करिणः ।
वशयितुमपि वरमहिळां वाञ्छसि यदि हृदि भावय भवानीम् ॥

स्वाभाविकारुणिम्ना सौभाग्यस्फुरणशालिना वपुषा ।
मदनद्विपोपि हृदयं वशयति या वस्तु वासना हृदि सा ॥ १२ ॥

हारविकासिपयोधरभारानतमध्यचारुदेहलताम् ।
तरुणेन्दुमौळितरुणीमरुणामश्वाधिरोहिणीमीडे ॥ १३ ॥

पठतामनुवासरं जनानां परविद्याक्षरगर्भितां स्तुतिम् ।
प्रभवत्यखिलार्थसंपदः सा प्रकृतिर्विश्वमयी प्रसीदति ॥ १४ ॥

इति अश्वारूढास्तोत्रं समाप्तम् ॥

इति प्रपञ्चसारसारसंग्रहे गीर्वाणेन्द्रविरचिते
एकत्रिंशः पटलः ॥